इति कविकल्पलता॥ अजमीढ़स्य राज्ञ: नीलिन्यां पत्न्यां जात: पुत्त्र:। यथा। "अजमीढ़स्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञ: पुत्त्रोऽभवत्।" इति विष्णुपुराणे ४ अंशे १९ अध्याय:॥ (माहिष्मतीवासी नृपतिविशेष:। अग्निस्तु अस्य दुहितरमुपसंगम्य वरेणैनं छन्दयामास परराष्ट्रभयघाश्चै दत्तवान्। गच्छति काले पाण्डव: सहदेवस्तु दिग्विजयक्रमेण अस्य नगरमवरोध्य वैश्वानरात् महद्भयमवाप्तवान्। ततो हव्यवाहनं स्तुत्वा शान्तिमलभत। एतद्विवरणं महाभारते। २। ३१। अध्याये विस्तरतो द्रष्टव्यम्॥ * ॥ नागविशेष:। यथा, महाभारते। १।३५।७।
"नीलानीलौ तथा नागौ कल्माषशबलौ तथा॥"

नीलकं, क्ली, (नीलमेव। स्वार्थे कन्।) काचलवणम्। वर्त्तलोहम्। असनवृक्षे, पुं। इति राजनिर्घण्ट:॥

नीलकण्ठ:, पुं, (नील: नीलवर्ण: कण्ठो यस्य।) शिव:। (यथा, महाभारते।१२।१८।४३—४४।
"त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषम्।
प्राशयल्लोकरक्षार्थं ब्रह्मणो वचनाच्छिव:॥
दधार भगवान् कण्ठे मन्त्रमूर्त्तिर्महेश्वर:।
तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुत:॥")
मयूर:। इत्यमर:।२।५।३०॥ (यथा, मेघदूते। ३९।
"यामध्यास्ते दिवसविगमे नीलकण्ठ: सुहृद्व:॥")
पीतसार:। दात्यूह:। ग्रामचटक:। खञ्जरीट:। इति हेमचन्द्र:॥ मूलके, क्ली। इति राजनिर्घण्ट:॥ * ॥ विजयदशम्यां नीलकण्ठदर्शनविधिर्यथा,—
"कृत्वा नीराजनं राजा बलवृद्ध्यै यथाबलम्।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ॥"
दर्शनानन्तरं नमस्कारमन्त्रो यथा,—
"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद।
पृथिव्यामवतीर्णोऽसि खञ्जरीट! नमोऽस्तु ते॥
त्वं योगयुक्तो मुनिपुत्त्रकल्प-
मद्यश्नतामेषि शिखोद्गमेन।
त्वं दृश्यसे प्रावृषि निर्गतायां
त्वं खञ्जनाश्चर्य्यमयो नमस्ते॥"
द्रव्यविशेषोपरिस्थितस्य तस्य दर्शनफलं यथा,—
"अब्जेषु गोषु गजवाजिमहोरगेषु
राज्यप्रद: कुशलद: शुचिशाद्वलेषु।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दु:खं ददाति बहुश: खलु खञ्जरीट:॥"
दिग्विशेषे फलं यथा,—
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामग्निभयं सुरद्विषि कलिर्लाभ: समुद्रालये।
वायव्यां वरवस्त्रगन्धसलिलं दिवाङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने॥"
अशुभखञ्जनदर्शनप्रायश्चित्तं यथा,—
"अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम्।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलै:॥"
इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम्॥
(पीतशालवृक्ष:। अस्य पर्य्यायो यथा,—
"नीलकण्ठ: पीतशाल: पीतक: प्रियकोऽसन:॥"
इति वैद्यकरत्नमालायाम्॥)

नीलकण्ठाक्षं, क्ली, (नीलकण्ठो महादेवस्तत्प्रियोऽक्षो यत्र।) रुद्राक्षम्। इति राजनिर्घण्ट:॥ (नीलकण्ठ: खञ्जनस्तस्य अक्षिणीव अक्षिणी यस्य। षच् समासे।) खञ्जनाक्षे, त्रि॥

नीलकन्द:, पुं, (नील: कन्दो मूलं यस्य।) महिषकन्दभेद:। तत्पर्य्याय:। सर्पाक्ष:२ वनवासी ३ विषकन्द: ४ महिषीकन्द: ५। अस्य गुणा:। कटुत्वम्। उष्णत्वम्। कफवातामयसुखनाशनाशित्वम्। रुच्यत्वम्। सितस्य तस्य महासिद्धिकरत्वञ्च। इति राजनिर्घण्ट:॥ नीलवर्णमूलञ्च॥

नीलकमलं, क्ली, (नीलं कमलं पद्मम्।) नीलवर्णपद्मम्। तत्पर्य्याय:। उत्पलम् २ नीलपङ्कजम् ३ नीलपद्मम् ४ नीलाब्जम् ५। अस्य गुणा:। शीतलत्वम्। स्वादुत्वम्। सुगन्धित्वम्। पित्तनाशित्वम्। रुच्यत्वम्। रसायने श्रेष्ठत्वम्। देहदार्ढ्यकेशदत्वञ्च। इति राजनिर्घण्ट:॥ नीलवर्णजलञ्च॥

नीलकुन्तला, स्त्री, (नीला नीलवर्णा: कुन्तला यस्या:।) गौर्य्या: सखीविशेष:। यथा,—
"सखी रत्नमुखी नाम जगादैवं सुचिस्मिता।
तां निवार्य्यापरा प्राह सखी सा नीलकुन्तला॥"
इति वृहद्धर्म्मपुराणे ३४ अध्याय:॥

नीलकुरण्टक:, पुं, (नील: कुरण्टक:।) नीलझिण्टी। इति रत्नमाला॥ (विवृतिरस्य नीलझिण्टीशब्दे ज्ञातव्या॥)

नीलक्रान्ता, स्त्री, (नीलेन नीलवर्णेन क्रान्ता।) विष्णुक्रान्ता। इति राजनिर्घण्ट:॥

नीलक्रौञ्च:, पुं, (नील: क्रौञ्च:।) नीलवक:। तत्पर्य्याय:। नीलाङ्ग: २ दीर्घग्रीव: ३ अतिजागर: ४। इति राजनिर्घण्ट:॥

नीलगणेश:, पुं, (नीलो नीलवर्णो गणेश:।) नीलवर्णगणपति:। इति भूतडामर:॥ अपि च।
"लीलागललुलल्लोलकालव्यालविलासिने।
गणेशाय नमो नीलकमलामलकान्तये॥"
इति लीलावती॥

नीलग्रीव:, पुं, (नीला नीलवर्णा ग्रीवा यस्य।) महादेव:। इति हलायुध:॥ (यथा, महाभारते। ३।३९।७४।
"देवदेव महादेव नीलग्रीव जटाधर॥")
नीलवर्णग्रीवायुक्ते, त्रि॥

नीलङ्गु:, पुं, (निलङ्गति गच्छतीति। नि+लगि गतौ+"खरुशङ्कुपीयुनीलङ्गुलिगु।" उणां।१।३७। इति कुप्रत्ययेन निपातनात् पूर्व्वदीर्घं साधु:।) अतिसूक्ष्मजन्तुमात्रम्। इत्यमरटीकायां भरत:॥ क्रिमिभेद:। शृगाल:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥ (भ्रमराली। प्रसूनम्। इति विश्व:। गे, ५०॥)

नीलचर्म्म, [न्] क्ली, (नीलं चर्म्म फलत्वग् यस्य।) परूषकम्। इति राजनिर्घण्ट:॥ (नीलञ्च तत् चर्म्म चेति।) नीलवर्णाजिनञ्च॥ (नीलचर्म्मविशिष्टे, त्रि॥)

नीलजं, क्ली, (नीलात् जायते इति। जन+ड:।) वर्त्तलोहम्। इति राजनिर्घण्ट:॥ नीलजाते, त्रि॥ (स्त्री, नीलात् नीलपर्व्वतात् जायते इति। वितस्ता नदी। यथा, राजतरङ्गिण्याम्। ५। ९६।
"पाषाणसेतुबन्धेन सुय्यनाद्भुतकर्म्मणा।
समाहमभवद्वक्रा निखिला नीलजा सरित्॥")

नीलझिण्टी, स्त्री, (नीला नीलवर्णा झिण्टी।) नीलवर्णझिण्टीपुष्पवृक्ष:। तत्पर्य्याय:। नीलकुरण्ट: २ नीलकुसुमा ३ बाला ८ बाणा ५ दासी ६ कण्टार्त्तगला ७। अस्या गुणा:। कटुत्वम्। तिक्तत्वम्। दन्तामयशूलवातकफकासत्वग्दोषनाशित्वञ्च। इति राजनिर्घण्ट:॥

नीलतरु:, पुं, (नीलस्तरु:।) नारिकेल:। इति राजनिर्घण्ट:॥

नीलताल:, पुं, (नीलस्ताल:।) हिन्ताल:। तमाल:। इति राजनिर्घण्ट:॥

नीलदूर्व्वा, स्त्री, (नीला दूर्व्वा।) हरितदूर्व्वा। तत्पर्य्याय:। हरिता २ शाम्भवी ३ श्यामा ४ शीता ५ शतपर्व्विका ६ अमृता ७ पूता ८ शतग्रन्थि: ९ अनुष्णवल्लिका १० शिवा ११ शिवेष्टा १२ मङ्गला १३ जया १४ सुभगा १५ भूतहन्त्री १६ शतमूला १७ महौषधी १८ विजया १९ गौरी २० शान्ता २१॥ (यथा निघण्टौ धन्वन्तरि:।
"नीलदूर्व्वा रुहा शष्पं शाद्वलं हरितं तथा।
शतपर्व्वा शीतकुम्भी शीतला वामनो तथा॥")
अस्या गुणा:। हिमत्वम्। तिक्तत्वम्। मधुरत्वम्। तुवरत्वम्। लघुत्वम्। रक्तपित्तातिसारकफवान्तिज्वरनाशित्वञ्च। पुस्तकान्तरे रोचनत्वम्। वातापहत्वञ्च। इति राजनिर्घण्ट:॥ (अस्या: पर्य्यायान्तरं गुणान्तरञ्च यथा,—
"नीलदूर्व्वारुहानन्ता भार्गवी शतपर्व्विका।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता॥
नीलदूर्व्वा हिमा तिक्ता मधुरा तुवरा हरेत्।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नीलध्वज:, पुं, (नील: नीलवर्ण: ध्वज इव।) तमालवृक्ष:। इति राजनिर्घण्ट:॥ (नीलो ध्वजो यस्य।) राजविशेष:। अस्य पुरी माहिष्मती। भार्य्या ज्वाला। कन्या स्वाहा लक्ष्मीशापाज्जाता।
"अर्ज्जुनस्य हयो राजन्! पुरीं माहिष्मतीं ययौ।
नीलध्वजेन वीरेण रक्षितां दुर्गमण्डिताम्॥
नीलध्वजस्य महिषी ज्वालानाम्नी सुमध्यमा।
स्वाहा कन्या प्रकृता सा सुन्दरी धर्म्मतत्परा॥"